श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथपादुकासहस्रम् ॥

## ॥ प्रस्तावपद्धतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ प्रस्तावपद्धतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः॥ १ ॥

भरताय परं नमोऽस्तु तस्मै प्रथमोदाहरणाय भक्तिभाजाम्।
यदुपज्ञमशेषतः पृथिव्यां प्रथितो रघवपादुकाप्रभावः॥ २ ॥

वर्णस्तोमैर्वकुलसुमनोवासनामुद्वहन्तीम्
आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तम्।
पादे नित्यप्रणिहितधियं पादुके रङ्गभर्तुः
त्वन्नामानं मुनिमिह भजे त्वामहं स्तोतुकामः॥ ३ ॥

दिव्यस्थानात् त्वमिव जगतीं पादुके गाहमाना
पादन्यासं प्रथममनघा भारती यत्र चक्रे।
योगक्षेमं सकलजगतां त्वय्यधीनं स जानन्
वाचं दिव्यां दिशतु वसुधाश्रोत्रजन्मा मुनिर्मे॥ ४ ॥

नीचेऽपि हन्त मम मूर्धनि निर्विशेषं
तुङ्गेऽपि यन्निविशते निगमोत्तमाङ्गे।
प्राचेतसप्रभृतिभिः प्रथमोपगीतं
स्तोष्यामि रङ्गपतिपादुकयोर्युगं तत्॥ ५ ॥

धत्ते मुकुन्दमणिपादुकयोर्निवेशात्
वल्मीकसम्भवगिरा समतां ममोक्तिः।
गङ्गाप्रवाहपतितस्य कियानिव स्यात्
रथ्योदकस्य यमुनासलिलाद्विशेषः॥ ६ ॥

विज्ञापयामि किमपि प्रतिपन्नभीतिः
प्रागेव रङ्गपतिविभ्रमपादुके त्वाम्।
व्यङ्क्तुं क्षमाः सदसती विगताभ्यसूयाः
सन्तः स्पृशन्तु सदयैर्हृदयैः स्तुतिं ते॥ ७॥

अश्रद्दधानमपि नन्वधुना स्वकीये
स्तोत्रे नियोजयसि मां मणिपादुके त्वाम्।
देवः प्रमाणमिह रङ्गपतिस्तथात्वे
तस्यैव देवि पदपङ्कजयोर्यथा त्वाम्॥ ८॥

यदाधारं विश्वं गतिरपि च यस्तस्य परमा
तमप्येका धत्से दिशसि च गतिं तस्य रुचिराम्।
कथं सा कंसारेर्द्रुहिणहरदुबोधमहिमा
कवीनां क्षुद्राणां त्वमसि मणिपादु स्तुतिपदम्॥ ९॥

श्रुतप्रज्ञासम्पन्महितमहिमानः कतिकति
स्तुवन्ति त्वां सन्तः श्रुतिकुहरकण्डूहरगिरः।
अहं त्वल्पस्तद्वत् यदिह बहु जल्पामि तदपि
त्वदायत्तं रङ्गक्षितिरमणपादावनि ! विदुः॥ १०॥

यदेष स्तौमि त्वां त्रियुगचरणत्रायिणि ! ततो
महिम्नः का हानिस्तव मम तु सम्पन्निरवधिः।
शुना लीढा कामं भवतु सुरसिन्धुर्भगवती
तदेषा किम्भूता स तु सपदि सन्तापरहितः॥ ११॥

मितप्रेक्षालाभक्षणपरिणमत्पञ्चषपदा
मदुक्तिस्त्वय्येषा महितकविसंरम्भविषये।
न कस्येयं हास्य हरिचरणधात्रि ! क्षितितले
मुहुर्वात्याधूते मुखपवनविष्फूर्जितमिव॥ १२॥

निस्सन्देहनिजापकर्षविषयोत्कर्षोऽपि हर्षोदय-
प्रत्यढक्रमभक्तिवैभवभवद्वैयात्यवाचालितः।

रङ्गाधीशपदत्रवर्णनकृतारम्भैर्निगुम्भैर्गिरां
नर्मास्वादिषु वेङ्कटेश्वरकविर्नासीरमासीदति॥ १३॥

रङ्गक्ष्मापतिरत्नपादु! भवतीं तुष्टूषतो मे जवात्
जृम्भन्तां भवदीयशिञ्जितसुधासन्दोहसन्देहदाः।
श्लाघाघूर्णितचन्द्रशेखरजटाजङ्गालगङ्गापयः
त्रासादेशविशृङ्खलप्रसरणोत्सिक्ताः स्वयं सूक्तयः॥ १४॥

हिमवन्नलसेतुमध्यभाजां
भरताभ्यर्चितापादुकावतंसः।
अतपोधरधर्मतः कवीनाम्
अखिलेष्वस्मि मनोरथेष्वबाह्यः॥ १५॥

अनिदम्प्रथमस्य शब्दराशेरपदं
रङ्गधुरीणपादुके! त्वाम्।
गतभीतिरभिष्टुवान् विमोहात्
परिहासेन विनोदयामि नाथम्॥ १६॥

वृत्तिभिर्बहुविधाभिराश्रिता वेङ्कटेश्वरकवेः सरस्वती।
अद्य रङ्गपतिरत्नपादुके! नर्तकीव भवतीं निषेवताम्॥ १७॥

अपारकरुणाम्बुधेस्तव खलु प्रसादादहं
विधातुमपि शक्नुयां शतसहस्रिकां संहिताम्।
तथापि हरिपादुके! तव गुणौघलेशस्थिते-
रुदाहृतिरियं भवेदिति मिताऽपि युक्ता स्तुतिः॥ १८॥

अनुकृतनिजनादां सूक्तिमापादयन्ती
मनसि वचसि च त्वं सावधाना मम स्याः।
निशमयति यथाऽसौ निद्रया दूरमुक्तः
परिषदि सह लक्ष्म्या पादुके! रङ्गनाथः॥ १९॥

त्वयि विहिता स्तुतिरेषा पदरक्षिणि ! भवति रङ्गनाथपदे।
तदुपरि कृता सपर्या नमतामिव नाकिनां शिरसि॥ २० ॥

॥ इति पादुकासहस्रे प्रस्तावपद्धतिः प्रथमा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥